# Shri Kamakhya Kavacham 2

# શ્રીકામાખ્યાકવચમ્ ૨

## Document Information

Text title : kAmAkhyAkavacham 2

File name : kAmAkhyAkavacham2.itx

Category : devii, kAmAkShI, devI, kavacha

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : JUne 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2026

*sanskritdocuments.org*

# શ્રીકામાખ્યાકવચમ્ ૨

ૐ નમઃ શ્રીકામાખ્યાયૈ ॥

અસ્ય શ્રીકામાખ્યાકવચસ્ય સદાશિવ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીકામાખ્યા દેવતા ।
ધર્માર્થકામમોક્ષચતુર્વિધફલસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ધ્યાનમ્ ।
સિંહાસીનાં મહાદેવીં રક્તવસ્ત્રાં મનોહરામ્ ।
પાશાઙ્કુશધરાં દેવીં કામાખ્યાં ચિન્તયેદ્ બુધઃ ॥

ત્રિનેત્રાં ચન્દ્રવદનાં સર્વાલઙ્કારભૂષિતામ્ ।
વરાભયકરાં દેવીં ભક્તાનુગ્રહકારિણીમ્ ॥

અથ કવચમ્ ।
ૐ કામાખ્યા મે શિરઃ પાતુ કામેશી લલાટકમ્ ।
ભ્રુવૌ ત્રિપુરસુન્દરી નેત્રે પાતુ જગદ્ગુરુઃ ॥ ૧॥

કર્ણૌ મે કાલિકા પાતુ નાસિકાં ભુવનેશ્વરી ।
મુખં મે સર્વમઙ્ગલ્યા જિહ્વાં વાગીશ્વરી તથા ॥ ૨॥

દન્તાન્ પાતુ મહાદેવી ચિબુકં ચણ્ડિકાવતુ ।
કણ્ઠં મે ભૈરવી પાતુ સ્કન્ધૌ દુર્ગા સદાવતુ ॥ ૩॥

બાહૂ મે ભદ્રકાલી ચ કરૌ પાતુ સુરેશ્વરી ।
અઙ્ગુલીઃ કમલા પાતુ નખાન્ શ્રીર્વિજયાવતુ ॥ ૪॥

વક્ષઃ પાતુ જગન્માતા હૃદયં પરમેશ્વરી ।
સ્તનૌ મે સર્વસિદ્ધેશી પાર્શ્વૌ પાતુ શિવપ્રિયા ॥ ૫॥

નાભિં મે કામરૂપસ્થા કટિં પાતુ પરાત્પરા ।
ગુહ્યં મે ગુહ્યરૂપા ચ ઊરૂ પાતુ મહેશ્વરી ॥ ૬॥

જાનુની જગદાધારા જઙ્ઘે પાતુ જગન્મયી ।
ગુલ્ફૌ મે કામદાયિની પાદૌ પાતુ કૃપામયી ॥ ૭॥

સર્વાઙ્ગં સર્વદા પાતુ સર્વશક્તિસ્વરૂપિણી ।
અન્તર્બહિશ્ચ માં પાતુ કામાખ્યા કામદાયિની ॥ ૮॥

પૂર્વે માં પાતુ કામાક્ષી દક્ષિણે દુર્ગતારિણી ।
પશ્ચિમે પાર્વતી પાતુ ઉત્તરસ્યાં શિવપ્રિયા ॥ ૯॥

આગ્નેય્યાં ભૈરવી પાતુ નૈરૃત્યાં કાલિકાવતુ ।
વાયવ્યાં પાતુ માતઙ્ગી ઐશાન્યાં બગલામુખી ॥ ૧૦॥

ઊર્ધ્વં પાતુ મહાવિદ્યા અધસ્તાત્ પરમામ્બિકા ।
સર્વતો માં સદા પાતુ કામાખ્યા વિશ્વમોહિની ॥ ૧૧॥

રણે રાજકુલે ઘોરે વને શત્રુસમાકુલે ।
નદ્યાં ગિરૌ ચ દુર્ગે ચ રક્ષ માં પરમેશ્વરિ ॥ ૧૨॥

યઃ પઠેત્ પ્રાતરુત્થાય શ્રદ્ધાભક્તિસમન્વિતઃ ।
તસ્ય સિદ્ધિર્ભવેદ્ દેવિ ત્વત્પ્રસાદાન્ન સંશયઃ ॥ ૧૩॥

ભુક્તિં મુક્તિં ચ લભતે પુત્રપૌત્રાદિસમ્પદઃ ।
અન્તે દેવ્યા મહાલોકં યાતિ ભક્તઃ સુદુર્લભમ્ ॥ ૧૪॥

ઇદં કવચમજ્ઞાત્વા યો જપેન્મન્ત્રમીશ્વરિ ।
ન તસ્ય જાયતે સિદ્ધિર્વિઘ્નૈર્બાધ્યેત સર્વદા ॥ ૧૫॥

કવચેનાવૃતો નિત્યં ભક્તો યઃ સાધકોત્તમઃ ।
તસ્ય હસ્તે સદા સિદ્ધિર્દેવ્યાઃ કરુણયા ધ્રુવમ્ ॥ ૧૬॥

॥ ઇતિ મયોન્તન્ત્રે શ્રીકામાખ્યાકવચં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Durga Sharma

*Shri Kamakhya Kavacham 2*

pdf was typeset on June 28, 2026

Please send corrections to *sanskrit@cheerful.com*